# ॥ महागणेशपञ्चरत्नम् ॥

मुदाकरात्तमोदकं सदाविमुक्तिसाधकम्
कलाधरावतंसकं विलासिलोकरक्षकम्।
अनायकैकनायकं विनाशितेभदैत्यकम्
नताशुभाशुनाशकं नमामि तं विनायकम्॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरम्
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम्।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम्
महेश्वरं तमाश्रये परात्परं निरन्तरम्॥ २ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरम्
दरेतरोदरं वरं वरेभवक्त्रमक्षरम्।
कृपाकरं क्षमाकरं मुदाकरं यशस्करम्
मनस्करं नमस्कृतां नमस्करोमि भास्वरम्॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनम्
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम्।
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणम्
कपोलदानवारणं भजे पुराणवारणम्॥ ४ ॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम्।
हृदन्तरे निरन्तरं वसन्तमेव योगिनाम्
तमेकदन्तमेव तं विचिन्तयामि सन्ततम्॥ ५ ॥

महागणेशपञ्चरत्नमादरेण    योऽन्वहम्
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम्।
अरोगतामदोषतां सुसाहितीं सुपुत्रताम्
समाहितायुरष्टभूतिमभ्युपैति  सोऽचिरात्॥

॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्री-महागणेशपञ्चरत्नं सम्पूर्णम्॥

# ॥ महागणपति नवार्णवेदपाद स्तवः ॥

श्रीकण्ठतनय श्रीश श्रीकर श्रीदलार्चित।
श्रीविनायक सर्वेश श्रियं वासय मे कुले॥ १ ॥

गजानन गणाधीश द्विजराज-विभूषित।
भजे त्वां सच्चिदानन्द ब्रह्मणां ब्रह्मणस्पते॥ २ ॥

णषष्ठवाच्यनाशाय रोगाटविकुठारिणे।
घृणापालितलोकाय वनानां पतये नमः॥ ३ ॥

धियं प्रयच्छते तुभ्यम् ईप्सितार्थप्रदायिने।
दीप्तभूषणभूषाय दिशां च पतये नमः॥ ४ ॥

पञ्चब्रह्मस्वरूपाय पञ्चपातकहारिणे।
पञ्चतत्त्वात्मने तुभ्यं पशूनां पतये नमः॥ ५ ॥

तटित्कोटि-प्रतीकाश-तनवे विश्वसाक्षिणे।
तपस्वि-ध्यायिने तुभ्यं सेनानिभ्यश्च वो नमः॥ ६ ॥

ये भजन्त्यक्षरं त्वां ते प्राप्नुवन्त्यक्षरात्मताम्।
नैकरूपाय महते मुष्णतां पतये नमः॥ ७ ॥

नगजावरपुत्राय सुरराजार्चिताय च।
सगुणाय नमस्तुभ्यं सुमृडीकाय मीढुषे॥ ८ ॥

महापातकसङ्घात महारणभयापह।
त्वदीय कृपया देव सर्वानव यजामहे॥ ९ ॥

नवार्णरत्ननिगमपादसम्पुटितां स्तुतिम्।
भक्त्या पठन्ति ये तेषां तुष्टो भव गणाधिप॥

॥ इति श्री-महागणपति नवार्णवेदपादस्तवः सम्पूर्णः ॥

# ॥ गणपतिस्तवः ॥

## गर्ग ऋषिरुवाच

अजं निर्विकल्पं निराकारमेकम्
निरानन्दमानन्दमद्वैतपूर्णम्।
परं निर्गुणं निर्विशेषं निरीहम्
परब्रह्मरूपं गणेशं भजेम॥ १॥

गुणातीतमानं चिदानन्दरूपम्
चिदाभासकं सर्वगं ज्ञानगम्यम्।
मुनिध्येयमाकाशरूपं परेशम्
परब्रह्मरूपं गणेशं भजेम॥ २॥

जगत्कारणं कारणज्ञानरूपम्
सुरादिं सुखादिं गुणेशं गणेशम्।
जगद्व्यापिनं विश्ववन्द्यं सुरेशम्
परब्रह्मरूपं गणेशं भजेम॥ ३॥

रजोयोगतो ब्रह्मरूपं श्रुतिज्ञम्
सदा कार्यसक्तं हृदाऽचिन्त्यरूपम्।
जगत्कारणं सर्वविद्यानिदानम्
परब्रह्मरूपं गणेशं नताः स्मः॥ ४॥

सदा सत्ययोग्यं मुदा क्रीडमानः
सुरारीन् हरन्तं जगत्पालयन्तम्।
अनेकावतारं निजज्ञानहारम्
सदा विश्वरूपं गणेशं नमामः॥ ५॥

तमोयोगिनं रुद्ररूपं त्रिनेत्रम्
जगद्धारकं तारकं ज्ञानहेतुम्।
अनेकागमैः स्वं जनं बोधयन्तम्
सदा सर्वरूपं गणेशं नमामः॥६॥

तमः स्तोमहारं जनाज्ञानहारम्
त्रयीवेदसारं परब्रह्मसारम्।
मुनिज्ञानकारं विदूरे विकारम्
सदा ब्रह्मरूपं गणेशं नमामः॥७॥

निजैरोषधीस्तर्पयन्तं कराद्यैः
सुरौघान्कलाभिः सुधास्राविणीभिः।
दिनेशांशुसन्तापहारं द्विजेशम्
शशाङ्कस्वरूपं गणेशं नमामः॥८॥

प्रकाशस्वरूपं नभो वायुरूपम्
विकारादिहेतुं कलाधाररूपम्।
अनेकक्रियानेकशक्तिस्वरूपम्
सदा शक्तिरूपं गणेशं नमामः॥९॥

प्रधानस्वरूपं महत्तत्त्वरूपम्
धराचारिरूपं दिगीशादिरूपम्।
असत्सत्स्वरूपं जगद्धेतुरूपम्
सदा विश्वरूपं गणेशं नताः स्मः॥१०॥

त्वदीये मनः स्थापयेदङ्घ्रियुग्मे
जनो विघ्नसङ्घातपीडां लभेत।
लसत्सूर्यबिम्बे विशाले स्थितोऽयम्
जनो ध्वान्तपीडां कथं वा लभेत॥ ११॥

वयं भ्रामिताः सर्वथाऽज्ञानयोगा-
दलब्धास्तवाङ्घ्रिं बहून् वर्षपूगान्।
इदानीमवाप्तास्तवैव प्रसादात्
प्रपन्नान् सदा पाहि विश्वम्भराद्य॥ १२॥

एवं स्तुतो गणेशस्तु सन्तुष्टोऽभून्महामुने।
कृपया परयोपेतोऽभिधातुमुपचक्रमे॥

॥ इति श्रीमद्-गर्गऋषिकृतो श्री-गणपतिस्तवः सम्पूर्णः॥

# ॥ गणाष्टकम् ॥

एकदन्तं महाकायं तप्तकाञ्चनसन्निभम्।
लम्बोदरं विशालाक्षं वन्देऽहं गणनायकम्॥ १ ॥
मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनम्।
बालेन्दुशकलं मौलौ वन्देऽहं गणनायकम्॥ २ ॥
चित्ररत्न-विचित्राङ्ग-चित्रमालाविभूषितम्।
कामरूपधरं देवं वन्देऽहं गणनायकम्॥ ३ ॥
मूषकोत्तमम् आरुह्य देवासुरमहाहवे।
योद्धुकामं महावीर्यं वन्देऽहं गणनायकम्॥ ४ ॥
गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम्।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम्॥ ५ ॥
यक्षकिन्नर-गन्धर्व-सिद्ध-विद्याधरैः सदा।
स्तूयमानं महाबाहुं वन्देऽहं गणनायकम्॥ ६ ॥
अम्बिकाहृदयानन्दं मातृभिः परिवेष्टितम्।
भक्तप्रियं मदोन्मत्तं वन्देऽहं गणनायकम्॥ ७ ॥
सर्वविघ्नकरं देवं सर्वविघ्नविवर्जितम्।
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम्॥ ८ ॥
गणाष्टकमिदं पुण्यं यः पठेत् सततं नरः।
सिद्ध्यन्ति सर्वकार्याणि विद्यावान् धनवान् भवेत्॥

# ॥ गणेशभुजङ्गम् ॥

रणत् क्षुद्रघण्टानिनादाभिरामम्
चलत् ताण्डवोद्दण्डवत्पद्मतालम्।
लसत् तुन्दिलाङ्गोपरिव्यालहारम्
गणाधीशमीशानसूनुं तमीडे ॥ १ ॥

ध्वनिध्वंसवीणालयोल्लासिवक्त्रम्
स्फुरच्छुण्डदण्डोल्लसद्बीजपूरम्।
गलद्दर्पसौगन्ध्यलोलालिमालम्
गणाधीशमीशानसूनुं तमीडे ॥ २ ॥

प्रकाशज्जपारक्तरन्तप्रसून-
प्रवालप्रभातारुणज्योतिरेकम्।
प्रलम्बोदरं वक्रतुण्डैकदन्तम्
गणाधीशमीशानसूनुं तमीडे ॥ ३ ॥

विचित्रस्फुरद्रत्नमालाकिरीटम्
किरीटोल्लसच्चन्द्ररेखाविभूषम्।
विभूषैकभूषं भवध्वंसहेतुम्
गणाधीशमीशानसूनुं तमीडे ॥ ४ ॥

उदञ्चद्भुजावल्लरीदृश्यमूलोच्-
चलद्-भ्रूलता-विभ्रमभ्राजदक्षम्।
मरुत् सुन्दरीचामरैः सेव्यमानम्
गणाधीशमीशानसूनुं तमीडे ॥ ५ ॥

स्फुरन्निष्ठुरालोलपिङ्गाक्षितारम्
कृपाकोमलोदारलीलावतारम्।
कलाबिन्दुगं गीयते योगिवर्यैर्-
गणाधीशमीशानसूनुं तमीडे॥६॥

यमेकाक्षरं निर्मलं निर्विकल्पम्
गुणातीतमानन्दमाकारशून्यम्।
परं पारमोङ्कारमाम्नायगर्भम्
वदन्ति प्रगल्भं पुराणं तमीडे॥७॥

चिदानन्दसान्द्राय शान्ताय तुभ्यम्
नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम्।
नमोऽनन्तलीलाय कैवल्यभासे
नमो विश्वबीज प्रसीदेशसूनो॥८॥

इमं सुस्तवं प्रातरुत्थाय भक्त्या
पठेद्यस्तु मर्त्यो लभेत्सर्वकामान्।
गणेशप्रसादेन सिध्यन्ति वाचो
गणेशे विभौ दुर्लभं किं प्रसन्ने॥९॥

॥इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छङ्करभगवतः कृतौ
श्री-गणेशभुजङ्गं सम्पूर्णम्॥